**Journal of Interdisciplinary and Multidisciplinary Research (JIMR)**
E-ISSN:1936-6264| Impact Factor: 8.886|
Vol. 18 Issue 06, June- 2023
Available online at: https://www.jimrjournal.com/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

# बैदिकज्योतिषस्यैकमनुशीलनम्

Dr Biswaranjan pati,Associate Professor
Dept. of Jyotish, H.O.D,C.S.U, S.S. Campus. Puri

बैदिकसनातनऋषयः येषां चतुर्द्दशविद्यानां निर्देशं चकार ताः सर्वाः अधोलिखितरूपेण भवन्ति-

षडमिश्रितवेदा धर्मशास्त्रं पुराणकम् ।
मीमांसा तर्कमपि च एता विद्याश्चतुर्देश ।।

अर्थात् ऋग्यजुसामाथर्वाख्याः चत्वारो वेदाः धर्मशास्त्रं पुराणं मीमांसा न्याय षड्वेदाङ्गानि च सन्ति चतुर्द्दशविद्यास्थानानि । कतिपयाश्च उपबेहान् स्वीकृत्य अष्टादशविद्यास्थानानिति व्रुवन्ति । तद्यथा-

आयुर्वेदो धनुर्वेदो गान्धार्वश्चेव्यनुक्रमात् ।
अर्थशास्त्रं परंतस्माद्द्विधा ह्यष्टादशस्मृता ।।

(शिवपुराण वाय. 2/23)

एतेषु प्रोक्तेषु अष्टादशविद्यासु ज्योतिषमन्यतमं वर्तते । एतत् शास्त्रं वेदपुरुषस्य चक्षुस्थानीयमिति मन्यते । तदर्थमुक्तं च पाणिनीयशिक्षायाम् –

Journal of Interdisciplinary and Multidisciplinary Research (JIMR)
E-ISSN:1936-6264| Impact Factor: 8.886|
Vol. 18 Issue 06, June- 2023
Available online at: https://www.jimrjournal.com/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

छन्दपादौ तु वेदस्य हस्तौ कपोऽचपद्यते ।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।

शिक्षाघ्राणं तु वेदस्य मुखव्याकरणंस्मृतम् ।

तस्यात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।

(पाणिनीय शिक्षा)

आर्षप्रज्ञाविभण्डिताः भारतीयविद्यापरम्परायाः शिरोमणयः विवेकिनः प्रज्ञावन्ताः पण्डिताः इत्थं विमृशन्ति यथा क्षेत्रहीनः पुरुषः दृश्यमानस्य जमतः स्वरूपं द्रष्टुमसमर्थाः भवन्ति तथैब ज्योतिषज्ञानेन विना यज्ञादिकालनिर्द्धारण, बहुविध संस्काराणां समयनिरूपणं, विद्यामुहूर्तम्, विविधानां क्रोधवासादीनां समयनिर्द्धारणं, वास्तुनिरूरणम्, मूर्तिप्रतिष्ठा, सामुहिकशास्त्र, अंगविद्यास्वनविचारः, शकुनापशकुननिर्णयः, विविहः उपनयनम् चौलकर्म, पुरुषस्त्रीलक्षणबोधः रेखादिफलस्वरविद्याप्रभृतीनां सम्यग्रूपेण परिज्ञानं कर्तुं नैव शक्यते ।

किंचानेनैवशास्त्रेण मनुष्यः जन्मजन्मान्तरीयकर्मणः सुफलानि कुफलानि च ज्ञायन्ते तथा कुकर्मणः फलनिवृत्तये चापि शास्त्रनिर्द्दिष्टवर्त्मना यन्तः क्रियते । एतस्मिन् प्रसंगे ज्योतिषशास्त्रस्य प्रत्यक्षत्वमङ्गीक्रियते । तदुक्तम् –

अप्रत्यक्षाणिशास्त्राणि विवादस्तेषुकेवलम् ।

प्रत्यक्षं ज्योतिषशास्त्रं चन्द्राकौयत्रसाक्षिणौ ।।

भूत भविष्य-वर्तमानस्य विविधिकालस्य प्रत्यक्षीकरणाय शास्त्रमिदमनौपय्यं सर्वसिद्धान्तसिद्ध्यस्ति । पुनश्च वेदानां प्रमुखमुद्देश्यमस्ति यज्ञकर्मसम्पादनं यतो हि कर्मपरकाः ते कर्मणा जीवस्य बन्धमोक्षत्वं स्वर्गनरकादिफल विवेचनं च कुर्वन्ति । यज्ञश्च

**Journal of Interdisciplinary and Multidisciplinary Research (JIMR)**
E-ISSN:1936-6264| Impact Factor: 8.886|
Vol. 18 Issue 06, June- 2023
Available online at: https://www.jimrjournal.com/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

कालनिरूपणार्थं ज्योतिषशास्त्रस्य परमावश्यकता विद्यते । नानेव विना किमपि कर्तुं प्रभवेत् मनुष्यः । अतः वैदिकसाहित्येषु सर्वत्र ज्योतिश्शास्त्रस्य चर्चा परिलक्ष्यते । संहिता ब्रह्मणारण्यकोपनिषदादिषु प्रत्येकेषु ऋचासु ज्योतिर्विद्यायाः प्रभावः विलोक्यते एव ।

तर्हि किं तावत् ज्योतिषं शास्त्रम् इति शंकायां विद्वांसः एवं निराकुर्वन्ति – यत्र नक्षत्रग्रह तारकादि ज्योतिष्पिण्डानां गणनं क्रियते तेषां विषये वा यत्र चर्चा क्रियते तत् शास्त्रं ज्योतिषमिति कथ्यते । उक्तं च “ज्योतिषानां सूर्यादिग्रहाणां बोधकं शास्त्रं ज्योतिषम्” अर्थात् यक्याश्चयनेन सूर्यादिग्रहाणां बोधः जायते तत् शास्त्रं ज्योतिषमिति कथ्यते । परं तु शास्त्रमेतत् महाकाशेविद्यमानानां समस्तानां महाकाशीयपिण्डानामध्यायनम न क्रियते अपि तु सौरजगति विद्यमानानां ज्योतिष्पण्डानामेवाध्ययनं करोति । यतोहि नैकान् सौरमण्डलानि ग्रहनक्षत्र तारकाणि च कदाचित् महाकाशे आविर्भवन्ति तिरोभवन्ति च । भगवतः स्थूलशरीरश्चांशभूतानि एते सन्ति । ज्योतिषशास्त्रस्य मूलसिद्धान्तः वर्तते यत्र महाकाशेविद्यमानानां आकाशीयपिण्डानां प्रभाव समग्रब्रह्माण्डोपरि पतति अतः एतेषामध्ययनभस्माभिरवश्यमेव करणियम् ।

संस्कृताब्राह्मणारण्यकोपनिषद् समीहिताः वेदाः अस्यशास्त्रस्यालोडनं प्रत्येकेषु स्थलेषु कुर्वन्ति वेदाः अपि ग्रहनक्षत्रतारकादीनां प्रभावः प्राणीसमाजोपरि पतति तथा च आकाशीय पिण्डैः सह मानवसमाज्यस्य तादात्म्यसन्वन्धविद्यते इति निश्चित्य वेदाः एतत्शास्त्रस्य गम्भीराध्ययनं करोति । प्राणी समाजस्य सम्बन्धः आकाशीयपिण्डै सहः कथं सम्बन्ध वर्तते अथर्ववेदः अधोलिखितरूपेण समुपस्थापयति ।

चित्राणिसाकं दिविरोचनानि

सरीसृपाणि भुवने जवानि ।

तुर्मिशं सुमतिमिच्छमानो

अहानि गीर्भि सपर्याभि नाकम् ।।

अथर्व 19/7

अर्थात् द्युलोके अन्तरिक्षे वा नैकानि गुणभयानि नक्षत्रपिण्डानि वर्तन्ते यानि खलु सदा एकीभूताः वक्रशीघ्रगत्या महाकाशे चलन्ति । उत्तमबुद्धिं कामयन् सदाहं तेषां वन्दनं पूजनं च करोति । येन सुखाप्तिः भवेत् । एवं अनेन मन्त्रेणः आथर्वणवेदः नक्षत्राणि मनुष्य समाजं सुखदुःखं सद्बुद्धिं च प्रयच्छन्ति इति स्विकरोति । मनुष्यस्य या बुद्धिरस्ति सा बुद्धि नक्षत्राणां पूजनेन सम्भवति इति वेदानामभिमत्तम् । पुनश्च आथर्वणवेदः कथयति ।

यानि नक्षत्राणि दिव्यन्तरिक्षे

अपसु भूमौ यानि नगेषु दिक्षु

प्रकल्पंयश्चन्दुया यान्त्रेति

सर्वाणि ममैतामि शिवामीसन्तु ।।

अथर्व 19 /8 /1

अर्थात् यानि नक्षत्रणि चन्द्रमसा सह गच्छन्ति तानि सर्वाणि मदर्थे आकेशे अन्तरिक्षे, जले पृथिव्यां पर्वतोपरि सदा सुखदायिनः भवन्तु । अत्र प्रश्नः समुदेति चन्द्रमाकान्ति नक्षत्राणि आश्रित्य अन्तरिक्षे चलति तेषां नक्षत्राणां का संख्या विद्यते । वेदेषु 28 नक्षत्राणि

अधिगृहितानि । तेषां नामानि अथर्ववेदस्य 19 7 2-5 मन्त्रेषु अभिहितानि । एतानि एव नक्षत्रनामानि ज्योतिषशास्त्रे स्वीकृतानि । अतः वक्तुं शक्यते ज्योतिषशास्त्रस्य मूलं वेदैवास्ति । पुनश्च तत्रैवोल्लिखितमस्ति ।

अप्यविंशतिशिवानि

शग्मानि सह योगं भजन्तु मे ।

योगं प्रपद्ये क्षेयं च क्षेमं प्रपद्ये

योगं च नमो होरागाभ्यामस्तु ।9/8/2

अर्थात् अष्टविंशति नक्षत्राणि मह्यं कल्याणकारी सुखं प्रयच्छन्तु सामार्थ्यमपि ददतु इति । नक्षत्रेभ्यो नम इति स्तेति वेदः । अस्मात् मन्त्राद् ज्ञायते नक्षत्राणां पूजनेन योग क्षेमस्यावाप्तिः जायते । अलभ्य वस्तुनः प्राप्तिः योगः तस्य संरक्षणं च कल्याणमित्युच्यते । अतः अस्मात् ज्ञायते प्रसन्नानि नक्षत्राणि मनुष्योभ्यः योगक्षेत्रं च प्रयच्छन्ति इति । पुनश्च अस्मिन्नेवमन्त्रे अहोरात्रशब्दस्य व्यवहारः कृतः अहोरात्रेतिशब्देन सह ज्योतिषशास्त्रस्य घनिष्ठः सम्बन्धः वर्त्तते । होराशास्त्रे अस्य महत्त्वमनस्वीकार्यं वर्त्तते । उक्तं च –

अहोरात्राद्यन्तलोपाद्धोरेति प्रोच्यते बुद्धैः

तस्य हिज्ञानमात्रेण जातकर्मफलं वदेत् ।।        बृ.पा.हो.शा. 2/2

अहोरात्रेति शब्दस्यादिमान्त्याक्षारलोपे कृते होराशब्दनिष्फलः भवति । होराज्ञानेन समग्रं ज्योतिषं शास्त्रं विभाति मानवस्य मनांसि ।

ज्योतिःशास्त्रस्य मूलभूतग्रन्थः सूर्यसिद्धान्तः अस्ति । अस्य मूलभूताः ये सिद्धान्ताः तेषां प्रतिपादनं प्रायशः वेदेषु कृतमस्ति । शून्यतः आरभ्य परार्द्धपर्यन्तं अंकगणनं रेखागणितं,

Journal of Interdisciplinary and Multidisciplinary Research (JIMR)
E-ISSN:1936-6264| Impact Factor: 8.886|
Vol. 18 Issue 06, June- 2023
Available online at: https://www.jimrjournal.com/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

मापनविधि वर्तुल तथा त्रिकोणसिद्धान्तः ऋगवेदस्य 2/ 18/ 4-6, अथर्व 13/4/15-18, यजु 9/31-34 अथर्व 8/9/2 मन्त्रेषु विलोक्यते । सम्बत्सराणि, मासाः ऋतवऋ, अयनगतिः नक्षत्राणि ग्रहणज्ञानं, इत्यादि ज्योतिःशास्त्रस्य मूलभूततत्त्वानि वैदिकवाङ्मये विद्यमानानि सन्ति । वैदिकसाहित्यं ब्रह्मणः द्विबिधंरूपंस्मर्यते तत्र यन्मूर्तरूपं तदसत्यं यच्चामीर्त्तं तत् सत्यम् । सत्सज्ञकः अमूर्त ज्योतिषरेव ब्रह्मज्योतिरिरिति कथ्यते ।

द्वे वाव ब्रह्मणो रूपे मूर्तं च । अथ यन्मूर्तं तदसत्यम् । यदमूर्तं तद् सत्यं तद् ब्रह्म तद् ज्योतिः

मैत्रायव्युपनिषद – 5-3

पुनश्च अथर्वशिरउपनिषदि अक्षरब्रह्मणः सकाशात् कालस्योत्पत्तिः इति अभिहितमस्ति । अक्षरात् संजायते कालः (अथर्वशिर उपनिषद्)

पुनश्च कालस्य स्वरूपं प्रतिपादनम् मैत्रायव्युपनिषदि अभिहितमस्ति कालाकालेति ब्रह्मण द्विविधं रूपं विद्यते । आभ्यां यत् आदित्यात् पूर्वं तत् रूपं अकालः यस्तु आदित्यात् परं तद् रूपं काल इति कथ्यते । तदुक्तमस्ति-

हे वाव ब्रह्मणो रूपे कालश्चा कालश्च अथयः प्रागादित्यात् सोऽकालोऽकलः । अथ यः आदित्यात् पश्चात् स कालः सकलः । सकलस्य वा एतद्रूपं यत्सवत्सरः ।

(मैत्रायव्युपनिषद् 6/15)

कालस्य स्वरूपं विवफता भगवता श्रीकृष्णेनापि कथितम् अहमेवा क्षयः कालः

(गीता 10/ 30)

पुनश्च मैत्रायव्युपनिषदि अभिहितमस्ति अग्निना सद सम्बद्ध ऋग्वेदः सर्वरूपस्योद्धासकः। वायुना सह सम्बद्धः यजुः सर्व गतेः बोधकः सूर्येण सह सम्बद्ध सामः सर्वतेजसः सम्पादकश्चास्ति। चन्द्रेण सह सम्बद्ध आथर्वण वद् अन्नस्य द्योतकोऽस्ति।

तदुक्तमस्ति –

ऋशभ्योः जातान् सर्वशोमूर्त्तिमाहः, सर्वागति योजुषी हे व शरवत्। सर्वं तेजः साम रूपं हि शश्वत्, सर्वं ह्र्येतत् ब्रह्मणैव प्रसृष्टम् (तैत्तिरीयसंहिता) वैदिकसंहितासु ब्राह्मणग्रन्थेष्वपि ज्योतिश्शास्त्रोक्ताः वास्तुसिद्धान्ताः विलोक्यते । योषां सिद्धान्तानां क्रमविकाशो भूत्वा कालान्तरे वास्तुशास्त्ररूपेण परिगणिताः अभवन्। शतपथब्राह्मणस्य तृतीयकाण्डान्तर्गत प्रथमप्रपाठके देवयजनस्थलवर्णन प्रसंगे वस्तु विधायाः सोदाहरणवर्णनं विलोक्यते। अस्य मतानुसारं सूर्ये त्रिणिपदार्थानि भवन्ति तेषु यत् ज्योतिर्भागः तं देवः इति कथ्यते। सूर्यश्च प्रकाशमयः भागः एव देव इति कथ्यते। तस्मात् श्रुतयः वर्णयन्ति-

चित्रं देवानामुदगादनिकं चक्षुभिन्नस्य वरुणस्याग्नेः। आप्राद्यावापृथिवी अन्तरिक्षँ सूर्यआत्मा जगतस्तस्युषश्च यजुर्वेदः 8 /24

पुनश्च श्रुतयः ज्योतिस्वरूपं विवृण्वन्तः प्रतिपादयन्ति देवरूपाः सूर्यरश्मयः द्युलोकात् पृथिवीं प्रति अवतीर्य स्वतेजसा सर्वेषां परिप्रकाशं कृत्वा पुनः द्युलोकं प्रति प्रत्यावर्तनं कुर्वन्ति। तदुक्तं

आयं गौः पृश्नरक्रमीदसन् मातरं पुरः। पितरं च प्रयन्त्स्वः ।।

अन्तश्चरति रोचनास्य प्राणादपानती। व्यख्यन् महिषो दिवम् ।।

यजुर्वेदः 3/6-7)

एवं बैदिकसंहिताब्राह्मणाख्यकोपनिषदादिषु ज्योतिषीयसिद्धान्ताः विलोक्यन्ते । वेदाः सन्ति सर्वज्ञानविज्ञानस्य आधारमणयः तेषां सम्यगध्ययनेन चिन्तनेन मनने च किमपिज्ञानमवशिष्टं न भवेत् तदर्थमुक्तं भगवता मनुना "सर्वज्ञानमयो हि सः" । अतः सदा अस्माकं समाजस्य कल्याणाय प्रगतये च वेदानां तदंगभूतानामपिशास्त्राणां यथाविधिरध्ययनं कर्त्तव्यम् ।